**स्कन्धाग्नि** पु० स्कन्धजातोऽग्निः । वृहत्काष्ठजाते वह्नौ जटा० ।

**स्कन्धावार** पु० स्कन्धार्थमावारः आ+वृ-घञ् । युद्धार्थ- उद्युक्तसैन्यानां १स्थापने २तदाधारे कटके च ३राजधान्यां शब्दच० । [वृषादौ हेमच०

**स्कन्धिक** पु० स्कन्धेन वहनमस्त्यस्य ठन् । स्कन्धवाहके

**स्कन्धिन्** पु० स्कन्धस्तेन वहनमस्त्यस्य इनि । स्कन्धेन वा- हके वृषादौ रत्नमा० ।

**स्कन्न** त्रि० स्कन्द-क्त । १च्युते अमरः २गलिते ३क्षरिते ४शुष्के ५गते च । भावे क्त । ६क्षरणे न० ।

**स्कन्भ** प्रतिघाते क्र्या० स्वा० उ० सक० सेट् । स्कभ्नाति स्कभ्नीते स्कभ्नोति स्कभ्नुते । अस्कम्भीत् अस्कम्भिष्ट । चस्कम्भ चस्क(म)म्भे । [म्भिष्ट ।

**स्कभ** स्तम्भे भ्वा० आ० सक० सेट् इदित् । स्कम्भते अस्क-

**स्कु** उद्धृतौ आप्लावने च क्र्या० स्वा० उ० सक० अनिट् । स्कु- नाति स्कुनीते स्कुनोति स्कुनुते । अस्कौषीत् अस्कोष्ट । चुस्काव चुस्कुवे । [स्कुन्दते अस्कुन्दिष्ट ।

**स्कुद** आप्लावने उद्धृतौ च भ्वा० आ० सक० सेट् इदित् ।

**स्कुन्भ** रोधने सौ० क्र्या० स्वादि० कार्य्यभागी प० सक० सेट् स्कुभ्नाति स्कुभ्नोति । अस्कुम्भीत् । उदित् क्त्वा वेट् ।

**स्खद** विदारे दि० आ० सक० सेट् । स्खद्यते अस्खदिष्ट घटादि० स्खदयति । [स्खलयति स्खालयति ।

**स्खल** चले भ्वा० प० अक० सेट् । स्खलति अस्खालीत् वा घटा०

**स्खलन** न० स्खल-भावे ल्युट् । १चलने २पतने अमरः ।

**स्खलित** न० स्खल-भावे क्त । १कूटयुद्धादौ प्रवृत्त्या वीर- मर्य्यादातः १पतने २स्खलनमात्रे च अमरः । कर्त्तरि क्त । ३चलिते त्रि० ।

**स्तन** मेघशब्दे अद० चु० उभ० सक० सेट् । स्तनयति ते अतस्तनत् त । वकारचकत्वान्न षोपदेशः ।

**स्तन** पु० स्तन-अच् । (माइ) स्त्रीणामङ्गभेदे पयोधरे अमरः । "अरोमशौ स्तनौ पीनौ घनावविषमौ शुभौ" स्तनयोः शुभलक्षणं गारुडे ६६ अ० । [शब्दे च मेदि० ।

**स्तनन** न० स्तन-ल्युट् । १ध्वनिमात्रे २मेघशब्दे ३कुन्थन-

**स्तनन्धय** पुंस्त्री० स्तनं धयति धे-खश् मुम् च । अतिशिशौ घेटष्टित्त्वात् स्त्रियां ङीप् । [अमरः । स्त्रियां टाप् ।

**स्तनप** पुंस्त्री० स्तनं पिबति पा-क । अतिशिशौ बालके

**स्तनभर** पु० ६त० । १स्थूलस्तनभारे २तदाभोगे च त्रिका० ।

**स्तनयित्नु** पु० स्तन-इत्नु । १मेघे २मुस्तके अमरः ३मेघशब्दे मेदि० ४विद्युति शब्दर० । ५मृत्यौ ६रोगे च हेमच० ।

**स्तनवृन्त** पु० स्तनस्य वृन्त इवाग्रम् । १स्तनाग्रे चूचुके हेमच० स्तनमुखशिखादयोऽप्यत्र हेमच० । [च ।

**स्तनान्तर** न० स्तनयोरन्तरम् । १हृदये हेमच० २स्तनमध्ये

**स्तनाभोग** पु० ६त० । स्तनस्य परिपूर्णतायाम् त्रिका० ।

**स्तनित** न० स्तन-भावे क्त । १मेघशब्दे अमरः । २सुरतादि- शब्दे च । कर्त्तरि-क्त । ३शब्दिते त्रि० ।

**स्तनितफल** पु० स्तनिते मेघशब्दे फलति फल-अच् । वि- कङ्कतवृक्षे राजनि० ।

**स्तन्भ** रोधने क्र्या० स्वा० प० सक० सेट् उदित् क्त्वा वेट् । स्तभ्नाति स्तभ्नोति इरित् अस्तभत् अस्तम्भीत् । इदित्यन्ये षोपदेश एव न्याय्यः सौत्रोऽयमित्यन्ये तेन न षोपदेशः ।

**स्तन्य** न० स्तने भवम् यत् । स्तनजाते दुग्धे हेमच० । [भूते च

**स्तब्ध** त्रि० स्तम्भ-कर्मणि कर्त्तरि वा क्त । १जडीकृते २जडी-

**स्तब्धरोमन्** पु० स्तब्धं रोमास्य । १शूकरे अमरः जडीकृत- रोमणि त्रि० स्त्रियां वा डाप् ङीप् च ।

**स्तम्ब** पु० स्था-अम्बच् किच्च पृषो० । काण्डरहिते भिण्ट- काटौ वृक्षे २वृक्षगुल्मे ३तृणादेः गुच्छे च अमरः ।

**स्तम्बकरि** पु० स्तम्बं गुच्छं करोति कृ-इन् । व्रीहिधान्ये अमरः । [न्मूलके खनित्रादौ अमरः ।

**स्तम्बघन** पु० स्तम्बो हन्यतेऽनेन हन-क नि० । स्तम्बो-

**स्तम्बघ्न** त्रि० स्तम्बो हन्यतेऽनेन हन-घञर्थे क । स्तम्बो- न्मूलके खनित्रादौ अमरः । स्तम्बहननमप्यत्र ।

**स्तम्बपुर्** स्त्री स्तम्बप्रधाना पूः न समासान्तः । ताम्रलिप्ते पुरभेदे हेमच० ।

**स्तम्बेरम** पुंस्त्री० स्तम्बे तृणादीनां काण्डे गुच्छे गुल्मे वा रमते रम-अच् अलुक्स० । गजे अमरः स्त्रियां ङीष् ।

**स्तम्भ** पु० स्तम्भ-अच् । (थाम) १स्थूणायाम् अमरः । भावे घञ् । २जडीभावे पु० ।

**स्तम्भन** पु० स्तम्भयति स्तम्भ-णिच् ल्यु । कन्दर्पस्य पञ्चसु वाणेषु मध्ये १वाणभेदे जटा० भावे ल्युट् । २जडीकरणे न० । करणे ल्युट् । षट्कर्मान्तर्गते तन्त्रोक्ते ३अभिचारकर्मभेदे

**स्तम्भित** त्रि० स्तम्भ जाड्ये णिच्-कर्मणि क्त । जडीकृते

**स्तरिमन्** पु० स्तॄ-कर्मणि इमनिच् । तल्पे उणा० ।

**स्तरी** स्त्री स्तॄ-कर्मणि ई । धूमे हेमच० ।

**स्तव** पु० स्तु-अप् । १प्रशंसायाम् २स्तुतौ च ।

**स्तवक** पु० स्तु-वुन् स्था-अवक पृषो० वा । गुच्छे अमरः । २ग्रन्थपरिच्छेदे ३समूहे च मेदि० ।

**स्तवेय्य** पु० स्तु-एय्य । इन्द्रे उणा० ।